नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः ॥ प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ अद्य ते भिन्नकंठस्य फेनबुद्बुदभूषितं ॥ विदा
रितस्य मद्बाणैर्मही पास्यति शोणितं ॥ पांसुरूषितसर्वांगः स्रस्तन्यस्तभुजद्वयः ॥ स्वप्स्यसे गां समाश्लिष्य दुर्लभां प्रमदामि
व ॥ प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने ॥ भवंत्वशरणस्थानां शरण्या दंडका इमे ॥ जनस्थाने हतस्थाने तव राक्षस मच्छरैः ॥ नि
र्भया विचरिष्यंति सर्वतो मुनयो वने ॥ अद्य विप्रसरिष्यंति राक्षस्यो हतबांधवाः ॥ बाष्पार्द्रवदना दीना भयादन्यभयावहाः ॥ अद्य
शोकरसज्ञास्ता भविष्यंति निरर्थकाः ॥ अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ नृशंसशील क्षुद्रात्मन् नित्यं ब्राह्मण
कंटक ॥ यत्कृते शंकितैरग्नौ मुनिभिः पात्यते हविः ॥ तमेवमभिसंरब्धं ब्रुवाणं राघवं वने ॥ खरो निर्भर्त्सयामास रोषा
त्खरतरस्वनः ॥ दृढं खल्ववलिप्तोसि भयेष्वपि च निर्भयः ॥ वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥ कालपाशपरिक्षि
प्ता भवंति पुरुषा हि ये ॥ कार्याकार्यं न जानंति ते निरस्तषडिंद्रियाः ॥ एवमुक्त्वा ततो रामं संरुध्य भृकुटिं ततः ॥ स ददर्श महासा
लमविदूरे निशाचरः ॥ रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् ॥ स तमुत्पाटयामास संदश्य दशनच्छदं ॥ तं समुत्क्षिप्य बाहु
भ्यां विनर्दित्वा महाबलः ॥ राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ तमापतंतं बाणौघैश्छित्वा रामः प्रतापवान् ॥ रोषमाहा
रयत्तीव्रं निहंतुं समरे खरं ॥ जातस्वेदस्ततो रामो रोषरक्तांतलोचनः ॥ निर्बिभेद सहस्रेण बाणानां समरे खरं ॥ तस्य बाणांत
राद्रक्तं बहु सुस्राव फेनिलं ॥ गिरेः प्रस्रवणस्येव तोयधारापरिस्रवः ॥ विह्वलः स कृतो बाणैः खरो रामेण संयुगे ॥ मत्तो रु
धिरगंधेन तमेवाभ्यद्रवद्द्रुतं ॥ तमापतंतं संरब्धं कृतास्त्रो रुधिराप्लुतं ॥ अपासर्पत्प्रतिपदं किंचित्त्वरितविक्रमः ॥ ततःपा

२१

वकसंकाशं वधाय समरे शरं ॥ खरस्य रामो जग्राह ब्रह्मदंडमिवापरं ॥ स तद्दत्तं मघवता सुरराजेन धीमता ॥ संदधे च स ध
र्मात्मा मुमोच च खरं प्रति ॥ स विमुक्तो महाबाणो निर्घातसमनिस्वनः ॥ रामेण धनुरायम्य खरस्योपरि पातयत् ॥ स प
पात ततो भूमौ दह्यमानः शराग्निना ॥ रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथांतकः ॥ स वृत्र इव वज्रेण फेनेन नमुचिर्यथा ॥ ब
लो वेंद्राशनिहतो निपपात हतः खरः ॥ ततो राजर्षयः सर्वे संगताः परमर्षयः ॥ सभाज्य मुदिता राममिदं वचनमब्रुवन् ॥ एतदर्थं
महातेजा महेंद्रः पाकशासनः ॥ शरभंगाश्रमं पुण्यमाजगाम पुरंदरः ॥ आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥ एषां व
धार्थं क्रूराणां रक्षसां पापकर्मणां ॥ तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥ सुखं धर्मं चरिष्यंति दंडकेषु महर्षयः ॥ एतस्मि
न्नंतरे देवाश्चारणैः सह संगताः ॥ दुंदुभींश्चाभिनिघ्नंतः पुष्पवर्षं समंततः ॥ रामस्योपरि संहृष्टा ववर्षुर्विस्मितास्तदा ॥
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥ चतुर्दश सहस्राणि रक्षसां कामरूपिणां ॥ खरदूषणमुख्यानां निहतानि म
हाहवे ॥ अहो बत महत्कर्म रामस्य विदितात्मनः ॥ अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते ॥ इत्येवमुक्त्वा ते सर्वे ययुर्देवा
यथागतं ॥ एतस्मिन्नंतरे वीरो लक्ष्मणः सह सीतया ॥ गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं सुखी ॥ ततो रामस्तु विजयी पू
ज्यमानो महर्षिभिः ॥ प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिवादितः ॥ तं दृष्ट्वा शत्रुहंतारं महर्षीणां सुखावहं ॥ बभूव हृष्टा वै
देही भर्तारं परिषस्वजे ॥ मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान् ॥ रामं चैवाव्यथं दृष्ट्वा तुतोष जनकात्मजा ॥ ततस्तु
तं राक्षससंघमर्दनं सभाज्यमानं मुदितैर्महर्षिभिः ॥ पुनः परिष्वज्य मुदान्विताननां बभूव हृष्टा जनकात्मजा तदा ॥

इत्यारण्यकाण्डे ३१ सर्गः॥ ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश॥ हतान्येकेन रामेण मानुषेण पदातिना॥ खरं त्रिशि-
रसं चैव दूषणं चैव साहसी॥ हतान् दृष्ट्वा महानादं मुमोच जलदोपमं॥ सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करं॥ जगाम
परमोद्विग्ना लंकां रावणपालितां॥ स ददर्श विमानाग्रे रावणं दीप्ततेजसं॥ उपोपविष्टं सचिवैर्मरुद्भिरिव वासवं॥
आसीनं सूर्यसंकाशे काञ्चने परमासने॥ रुक्मवेदीगतं प्राज्यं ज्वलन्तमिव पावकं॥ दशास्यं विंशतिभुजं दर्शनीयपरिच्छदं॥
विशालवक्षसं वीरं राजलक्षणलक्षितं॥ स्निग्धवैदूर्यसंकाशं तप्तकाञ्चनभूषणं॥ सुभुजं शुक्लदशनं महास्यं पर्वतो-
पमं॥ देवगन्धर्वभूतानामृषीणां च महात्मनां॥ अजेयं समरे शूरं व्यात्ताननमिवान्तकं॥ देवासुरविमर्देषु वज्राशनि-
कृतव्रणं॥ ऐरावणविषाणाग्रैर्बहुशः क्षतलक्षणं॥ वज्रनाराचसम्पातैश्च॥ बहुशो देवसंयुगे॥ अहर्लोकानमरस्ते- २८
२८ श्च देवमहारथान्॥ [illegible]॥ भेत्तारं पर्वताग्राणां पुराणीयमनावलीं॥ भो-
क्तारं सर्वधर्माणां दिव्यगन्धोपशोभितं॥ राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनं॥ अथाब्रवीद्दीर्घविरावा [illegible]
भयविह्वला ममा हृन्मूर्छिता॥ सा दारुणं वाक्यमदो नग्ना विरूपिता महात्मना [illegible]॥ ७॥ इत्यारण्यकाण्डे ३२ सर्गः॥
ततः शूर्पणखा दीना रावणं लोकरावणं॥ अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत्॥ प्रमत्तः सर्वभोगेषु स्वैरवृ-
त्तो निरंकुशः॥ समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे॥ सक्तं ग्राम्येषु भोगेषु स्वैरवृत्तं महीपतिं॥ लुब्धं न बहु मन्यन्ते
श्मशानाग्निमिव द्विजाः॥ स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः॥ तस्यात्मा सह कार्येण ततस्तेनैव नश्यति॥

अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपं॥ वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः॥ तस्यात्मा सह कार्येण ये न रक्षन्ति विषयं पराधीना
नराधिपाः॥ ते न वृद्ध्या प्रकाशन्ते गिरयः सागरे यथा॥ आत्मवद्भिर्विगृह्य त्वं देवदानवमानवैः॥ अयुक्तचारश्चपलः कथं राजा भविष्य-
सि॥ येषां चारश्च कोशश्च नयश्च जयतां वर॥ अस्वाधीना नरेन्द्राणां प्राकृतैस्ते जनैः समाः॥ यस्मात्पश्यन्ति दूरस्थान्सर्वानर्थान्नराधि-
पाः॥ चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः॥ अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्वृतं॥ जनस्थानं हतं येन यन्मोऽस्वा नावबुध्य-
से॥ खरं त्रिशिरसं चैव दूषणं च निपातितं॥ न बुध्यसे जनस्थाने [illegible]॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां॥
हतान्येकेन रामेण मानुषेण पदातिना॥ ऋषीणामभयं दत्तं कृताक्षेमाश्च दण्डकाः॥ धर्षितं च जनस्थानं सर्वदा राक्षसैर्मतं॥ हतानि च
सहस्राणि प्रतिनाशैव दूषणः॥ देवानां राक्षसानां च गन्धर्वाणां च संयुगे॥ अवध्यानां मानुषाणां च जयो नारं महाबलं॥ पुरा त्रिभु-
वनजित्वा पराजितस्त्वया सकृत्॥ [illegible]॥ येन वैश्रवणो राजा [illegible] निर्जितः॥ [illegible]
[illegible] नरवाहनः॥ विमाने पुष्पके चैव कामगे [illegible]॥ [illegible]॥ वने चैत्ररथे दिव्ये न
लिने नन्दने वने॥ विनाशाति यः क्रोधात् देवोद्यानानि वीर्यवान्॥ [illegible] महावेगा दुर्निरीक्ष्यो परंतपः॥ [illegible]
[illegible]॥ दशवर्षसहस्राणि तपस्तप्तं महावने॥ [illegible]॥ [illegible] निर्मोचितस्त्वया
[illegible]॥ [illegible]
दिती॥ कामरूपधरस्त्वं यः प्रतिपेदे महावरं॥ [illegible]॥ [illegible]
[illegible]॥ [illegible]॥ कर्कशो निरलंकारो [illegible]॥

देवदानवयक्षाणां पिशाचोरगरक्षसाम्॥ अवध्योऽसि समरे [illegible] वध्यो मानुषवानरैः॥ आस्व न सर्वलोकानां सर्वलोकविसारदौ॥ [illegible]
[illegible] मानदं क्रुद्धा सादरं रोमहर्षणी॥ तं दृष्ट्वा मानवं रामं रामं मलिनपुण्यकातिरी॥ तं तु लुब्धं प्रमत्तं च पराधीनं च रावणा॥ विषये ममतु
त्पन्नं वो दृष्ट्वा नावबुध्यसे॥ तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम्॥ व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम्॥ अतिमानिनमग्राह्य
मात्मसंभाविनं नरम्॥ क्रोधनं व्यसने हन्ति स्वजनोऽपि नराधिपम्॥ नानुतिष्ठति कार्याणि भयेषु न बिभेति च॥ क्षिप्रं राज्याच्च्यु
तो दीनस्तृणैस्तुल्यो भविष्यति॥ शुष्ककाष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः॥ न तु स्थानपरिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः॥
२९ उपभुक्तं यथा वासः स्रजो वा मृदिता यथा॥ एवं राज्यपरिभ्रष्टः समर्थोऽपि निरर्थकः॥ अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः॥
कृतज्ञो धर्मशीलश्च स राज्ये तिष्ठते चिरम्॥ नयनाभ्यां प्रसुप्तोऽपि जागर्ति नयचक्षुषा॥ [illegible] प्रमादं येन राक्षसाः
॥ त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः॥ यस्य ते विदितश्चारैः रक्षसां सुमहान्वधः॥ परावमन्ता विषयेषु संगतो
न देशकालप्रविभागतत्त्ववित्॥ अयुक्तबुद्धिर्गुणदोषनिश्चये विपन्नराज्यो न चिराद्विनङ्क्ष्यसि॥ इति स्वदोषान्परिकीर्तितां
स्तया समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः॥ धनेन दर्पेण बलेन चान्वितः अचिन्तयामास चिरं स रावणः॥ ॥ इत्यारण्यकाण्डे ४० सर्गः॥
ततः शूर्पणखां दृष्ट्वा ब्रुवतीं परुषं वचः॥ अमात्यमध्ये संक्रुद्धः परिपप्रच्छ रावणः॥ कोऽयं कस्य कुतो रामः किंवीर्यः किंपराक्रमः॥ ॥२९॥
केन दण्डकारण्यं प्रविष्टो दुश्चरं वने॥ आयुधं किं च रामस्य निहता येन राक्षसाः॥ खरश्च निहतो येन दूषणस्त्रिशिरास्तथा
॥ इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता॥ ततो रामं यथान्यायमाख्यातुमुपचक्रमे॥ दीर्घबाहुर्विशालाक्षश्
चीरकृष्णाजिनाम्बरः॥ कन्दर्पसमरूपश्च रामो दशरथात्मजः॥ शक्रचापनिभं चापं विकृष्य कनकाङ्गदम्॥ दीप्तान्क्षिपति ना

राचान्सर्पानिव महाविषान्॥ नाददानं शरान्घोरान्मुञ्चन्तं महाबलम्॥ कार्मुकं नापि कर्षन्तं रामं पश्यामि संयुगे॥ हन्यमानं तु तत्सै
न्यं पश्यामि शरवृष्टिभिः॥ इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः॥ रक्षसां भीमरूपाणां सहस्राणि चतुर्दश॥ निहतानि शरैस्तीक्ष्णै
स्तेनैकेन पदातिना॥ खरश्च निहतः संख्ये दूषणश्च [illegible]॥ एका कथंचिन्मुक्ताहं परिभूय महात्मना॥ रामेणा
तिवीर्येण स्त्रीवधे प्रदर्शिना॥ भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः॥ अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान्॥
अमर्षी दुर्जयो जेता विक्रान्तो मतिमान्बली॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः॥ रामस्य तु विशालाक्षी धर्मपत्नी
यशस्विनी॥ सीता नाम वरारोहा वैदेही तनुमध्यमा॥ नैव देवी न गन्धर्वी नासुरी नैव राक्षसी॥ तथारूपा मया नारी दृष्ट
पूर्वा महीतले॥ यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत्॥ अतिजीवेत्स सर्वेषु लोकेष्वपि पुरंदरः॥ सा सुशीला वपुःश्लाघ्या
रूपेणाप्रतिमा भुवि॥ तवानुरूपा भार्या स्यात्त्वं च तस्यास्तथा पतिः॥ सापि विस्तीर्णजघना पीनोत्तुङ्गपयोधरा॥ हर्तुमा
नेतुमुद्यता [illegible] मनः॥ दृष्ट्वा त्वद्य च वैदेहीं पूर्णचन्द्रनिभाननाम्॥ मन्मथस्य शराणां वै त्वं विधेयो भविष्यसि॥
[illegible] सा कथं मम [illegible] मम नासिका [illegible] राममानयेत्॥ यदि तस्यामभिप्रायो भार्यार्थे तव जायते
॥ शीघ्रमुद्ध्रियतां पादो सीतार्थमिह दक्षिणः॥ हरस्वेति कथं तेषां रक्षसां राक्षसेश्वर॥ [illegible] रामस्य [illegible]
[illegible]॥ [illegible] निर्विशङ्केन [illegible]॥ [illegible] यदि [illegible] मम [illegible]
[illegible] ॥ शीघ्रं [illegible] जनस्थानगतान्निशाचरान्॥
खरं च दृष्ट्वा निहतं च दूषणं त्वमद्य कार्यं प्रतिपत्तुमर्हसि॥ इत्यारण्यकाण्डे ४१ सर्गः॥ ॥ ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणम्

दर्वली ॥ सचिवानाभ्यनुज्ञाय जगाम स्वनिवेशनं ॥ तत्कार्यमनुगम्याथ यथावदुपलभ्य च । दोषाणां च गुणानां च संप्रधार्य बलाबलं ॥
इति कर्तव्यमित्येव गत्वा निश्चयमात्मवान् ॥ स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ यानशालां ततो गत्वा प्रच्छन्नो राक्षसाधिपः ॥
॥ सूतं संचोदयामास रथः संयुज्यतामिति ॥ एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ॥ रथं संयोजयामास तस्याभिमतमुत्तमं ॥
कांचनं रथमास्थाय कामगं रत्नभूषितं ॥ पिशाचवदनैर्युक्तं खरैः कनकभूषितैः ॥ तेन मेघप्रतिमनादेन स धनदानुजः ॥ राक्ष-
साधिपतिः श्रीमान्ययौ नदनदीपतिं ॥ स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः ॥ स्निग्धवैदूर्यसंकाशस्तप्तकांचनभूषणः ॥
दशास्यो विंशतिभुजो दर्शनीयपरिच्छदः ॥ त्रिदशारिर्मुनींद्रघ्नो दशशीर्ष इवाद्रिराट् ॥ कामगं रथमास्थाय शुशुभे राक्षसाधि- हवे
पः ॥ विद्युन्मंडलवान्मेघः सबलाक इवांबरे ॥ सशैलं सागरानूपं वीर्यवानवलोकयन् ॥ नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः ॥ समं-
ततः ॥ शीतनिर्मलतोयाभिः पद्मिनीभिः समंततः ॥ स्नागैर्बहुभिः स्रवंतीभिः सूर्यमाणां समंततः ॥ विशालैराश्रमपदैर्वेदिम-
द्भिः समावृतं ॥ कदलीवनसंबाधं नालिकेरोपशोभितं ॥ सालैस्तालैस्तमालैश्च पुन्नागैश्च सुपुष्पितैः ॥ अत्यंतनियताहारैः ३०
शोभितं परमर्षिभिः ॥ नागैः सुपर्णैर्गंधर्वैः किन्नरैश्च महात्मभिः ॥ विचार्य मैथुनात्येषु चारणैश्चोपशोभितं ॥ पौरुषास्ति विद्याधरैर्मुनि-
दिव्यमाल्यप्रसाधनैः ॥ तूर्यवीणाप्रणुष्टानि विमानानि समंततः ॥ तपसा जितलोकानां कामगान्यभिसंपतन् ॥ गोचरी पुरस्त्रा-
श्चैव ददर्श धनदानुजः ॥ अजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः ॥ अत्यंतनियताहारैः शोभितं परमर्षिभिः ॥ दिव्याभ-
रणोपेताभिर्दिव्यमाल्यवपुर्धराः ॥ क्रीडारतिविधिज्ञाभिरप्सरोभिः समंततः ॥ सेवितं देवपत्नीभिः श्रीमतीभिः समंततः ॥
देवदानवगंधर्वैः सेवितं ... ॥ हंसक्रौंचप्लवाकीर्णं सारसैः संप्रणादितं ॥ वैदूर्यप्रस्तरं रम्यं स्निग्धं सा-

गरतेजसा ॥ तिर्यक्संस्थानसंस्थानां चंदनानां सहस्रशः ॥ वनानि पश्यन्सौम्यानि घ्राणतृप्तिकराणि च ॥ अगुरूणां च मुख्यानां वनान्युप-
वनानि च ॥ तक्कोलानां च जात्यानां फलानां च सुगंधिनां ॥ पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च ॥ मुक्तानां च समूहानि शुष्य-
माणानि तीरतः ॥ शंखानां प्रस्तरं चैव प्रवालनिचयं तथा ॥ उद्धृतानि यथाकामं तस्मै सलिलराशिभिः ॥ कांचनानि च शृंगा-
णि च राजतान्येव सर्वदा ॥ प्रस्रवणानि मनोज्ञानि प्रसन्नानि ॥ धनधान्योपपन्नानि स्त्रीरत्नैरावृतानि च ॥ हस्त्य-
श्वरथगाढानि नगराण्यवलोकयन् ॥ तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतं ॥ अनूपं सिंधुराजस्य ददर्श धनदानुजः ॥
तत्रापश्यत्स मेघाभं न्यग्रोधं मुनिभिर्वृतं ॥ समंताद्यस्य ताः शाखाः शतयोजनमायताः ॥ यस्य हस्तिनमादाय महाकायं च
कच्छपं ॥ भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ तस्य तां सहसा शाखां भारेण पतगोत्तमः ॥ सुपर्णः पर्णबहुलां बभंजा-
थ महाबलः ॥ तत्र वैखानसा माषा वालखिल्या मरीचिपाः ॥ अजा बभूवुर्धूम्राश्च संगताः परमर्षयः ॥ तेषां दयार्थं गरुड-
स्तां शाखां शतयोजनां ॥ जगामादाय वेगेन तौ चोभौ गजकच्छपौ ॥ स निषाददेशं च ... ॥ निषादविषयं
देशं ... शाखया ... ॥ निषादविषयं हत्वा शाखया पतगेश्वरः ॥ प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥ स तेन
तु प्रहर्षेण द्विगुणीकृतविक्रमः ॥ अमृतानयनार्थं वै चकार मतिमान्मतिं ॥ अयोजालानि निर्मथ्य भित्त्वा रत्नगृहं वरं ॥
महेंद्रभवनाद्गुप्तमाजहारामृतं ततः ॥ तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणं ॥ नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥
... विटपसंकीर्णं ... ॥ तं तु गत्वा परं पारं समुद्रस्य नदीपतेः ॥ ददर्शाश्रममेकांते पुण्ये रम्ये वनांत-
रे ॥ तत्र कृष्णाजिनधरं जटामंडलधारिणं ॥ ददर्श नियताहारं मारीचं नाम राक्षसं ॥ तं रावणः समागम्य विधिवत्तेन

तेजसा॥ कुबेरस्येव विप्रर्ष यथा देवेन्द्रजितः॥ ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः॥ इत्यारण्यकांडे ४४ सर्गः॥ ०॥ मारीचवध
तोतावत्वचनं मम भाषतः॥ आर्तो विस्मिमवार्तस्य त्वलोनान्यापरा गतिः॥ ज्ञानीषे सेजनस्थाने पत्रमातारवे नमम॥ दूषणश्च
महावीर्यः स्वसाखर्वतरखा वने॥ त्रिशिरश्च महातेजा राक्षसः पितृताम्रलः॥ अन्ये च बहवः शूरा राक्षसाः तत्र ते रणाः च
संतिमच्चि योगान रो बलाहृविक्रमाः॥ वाचमानाम महाराजे त्वन्नीन्यधर्म परायणान्॥ चतुर्दश सहस्राणि रक्षसां भी
मकर्मणां॥ बहवो लक्षलक्षाणि खरस्य वशवर्तिनी॥ ते विदानोजनस्थाने वसमाना महाबले॥ सेनां ताः परमायत्तारा
मणाकिम्भसंयुगे॥ तेन संजाततरोषेण रामेणारणमूर्धनि॥ अनुक्ता विप्रियं किंचित्तच्छरैरेवाग्नि विषोपमैः॥ निहता निशि
रक्ताः क्षोमे नुड्रीनपदातिनः॥ खरश्च निहतः संख्ये दूषणं त्रिशिरास्तथा॥ स पीणा मस्य येद यैकुता लेमा च देकृता॥
पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः॥ स हंता तस्य सैन्यस्य रामः क्षत्रियपांसनः॥ अशीलः कर्कशस्तीक्ष्णो मूर्खो लु
ब्धो जितेंद्रियः॥ त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः॥ येन वैरं विनारण्ये सत्वमास्थित्य केवलं॥ कर्णनासापहारेण
भगिनी मे विरूपिता॥ तस्य भार्यां जनस्थानेनानासीतेति विश्रुता॥ कः प्रयो वनसीप...कोमीः सपदेव कुपिता॥ भ्रान्त्या
तस्मात् जनस्थानानामहेलोकसंदरी॥ आनयिष्यामि विक्रम्य सहायस्त्वं भवेति मे॥ त्वया ह्यहं सहायेन पार्श्वस्थेन निरा
ना॥ संवानिपि करान् सर्वान् नेजविंत चिन्तुमुत्सहे॥ तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस॥ वीर्ये युद्धे च दर्पे च न ह्यस्ति स
दृशस्तव॥ एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर॥ शृणु तत्कर्म साहाय्ये यत्कार्यं भवता मम॥ सौवर्णस्त्वं मृगो भूत्वा
चित्रो रजतविंदुभिः॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर॥ तां वनि संदाय सीतानिरामाप्य ग्रसपिष्णा॥ गृह्य तां मिति

स्त्रीकेश्यामो वाति संयास्यति॥ ततः शून्ये यथाकाममहं हरेयं तां सीतां यथा सत्त्वं निराबाधो हरिष्यामि सुखं यथा॥
ततः पश्चात्सुखं राम भार्याहरणकर्शिते॥ विस्रब्धं प्रहरिष्यामि कृतार्थेनांतरात्मना॥ तस्य राम कथां श्रुत्वा मारीचस्य मह
दयं॥ शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव सः॥ स रावणं त्रस्तविषण्णचेता महावने राममनुस्मरन्सः॥ कृतांजलिस्तत्त्वम
वाक्यं हितं च तस्मै हितमात्मनश्च॥ ०॥ इत्यारण्यकांडे सर्गः ४५॥ ०॥ एवमुक्तस्तु मारीचो दशग्रीवेण रक्षसा॥ उद्विग्नस्तत्र
रक्षो मा न विबेक मब्रवीत्॥ सुलभाः पुरुषा राजन्सततं प्रियवादिनः॥ अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः
॥ नूनं न बुध्यसे रामं यथावाद्वीर्यमहाबलं॥ अप्रमत्तं महेन्द्रवरुणोपमं॥ अपि स्वस्ति भवेत्तात सर्वेषां भुवि रक्ष
सां॥ अपि रामः सुसंक्रुद्धो कुर्याल्लोकमराक्षसं॥ अपि ते जीवितांताय नोत्पन्ना जनकात्मजा॥ अपि सीतानिमित्तं च न भवेद्व्य
सनं महत्॥ न हि पित्रा परित्यक्तो नामर्यादः कथंचन॥ न लुब्धो न च दुःशीलो नापि क्षत्रियपांसनः॥ न च धर्मगु
णैर्हीनः कौसल्यानंदवर्धनः॥ न च तीक्ष्णो हि भूतानां सर्वेषां च हिते रतः॥ वंचितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनं
करिष्यामीति धर्मात्मा ततः प्रव्रजितो वनं॥ कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च॥ हित्वा राज्यं च भोगांश्च प्रविष्टो
दंडकावनं॥ न रामः कर्कशस्तात नाविद्वान्नाजितेंद्रियः॥ अनृतं दुःश्रुतं चैव नैव त्वं वक्तुमर्हसि॥ रामो विग्रहवान्धर्मः साधुः
सत्यपराक्रमः॥ राजा सर्वस्य लोकस्य देवानामिव वासवः॥ कथं त्वं तस्य वैदेहीं रक्षितां स्वेन तेजसा॥ इच्छसि प्रसभं हर्तुं
प्रभामिव विवस्वतः॥ शरार्चिषमनाधृष्यं चापखड्गेंधनं रणे॥ रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि॥ धनुर्व्यादितदीप्ता
स्यं शरज्वालासमन्वितं॥ चापबाणधरं वीरं शत्रुसेनापहारिणं नाप्तं विषमिव क्रुद्धं न रामं स्प्रष्टुमर्हसि॥ ओं तापच रेवरं परसैन्यें न लेसा यमिलेना ताराम

 निबहणं

तस्मामिवर्हसि ॥ अप्रमेयं बलं तेजो यस्य स जनकात्मजा ॥ यतोन्योपि प्रियतमा राममेवं सदाश्रिता ॥ नत्वं समर्थस्तां हर्तुं रामचापाश्र
याग्रणी ॥ दीप्तस्येव हुताशस्य शिखां सीतां सुमध्यमां ॥ किमुद्यमं व्यर्थमिमं कृतवान् राक्षसेश्वर ॥ दृष्टश्चेत्त्वं रणे तेन तदंतं तव जी
वितं ॥ जीवितं च सुखं चैव राज्यं चैव सुदुर्लभं ॥ दौरात्म्यात्त्यजसे राजन् रामेणाभिसंगतः ॥ स सर्वैः सचिवैर्विभीषणसमं त्रयितुम
र्हसि ॥ मंत्रयित्वा च मंत्रिभिः कृत्वा निश्चयमात्मनः ॥ दोषाणां च गुणानां च संप्रधार्य बलाबलं ॥ आत्मनश्च बलं चैव राघ
वस्य तथा बलं ॥ आत्मनो हितं निश्चित्य तत्त्वं कर्तुमर्हसि ॥ अहं तु मन्ये तव न क्षमं रणे समागमं कोसलराजसूनुना ॥ इदं च भूयः शृणु वाक्यमु
त्तमं क्षमं च युक्तं च निशाचरेश्वर ॥ ७ ॥ इत्यारण्यकांडे ४४ सर्गः ॥ ७ ॥ पुराहं वीर्यमत्तो हि पर्यटन् पृथिवीमिमां ॥ ब
लं नागसहस्रस्य धारयन् पर्वतोपमः ॥ नीलजीमूतसंकाशस्तप्तकांचनकुंडलः ॥ भयं सर्वस्य जनयन् किरीटी परिघायुधः ॥
अचरं दंडकारण्ये मुनिमांसानि भक्षयन् ॥ विश्वामित्रोपि धर्मात्मा मत्त्रस्तो महामुनिः ॥ अभिगत्वा दशरथं नरेंद्र
मिदमब्रवीत् ॥ राजन् रक्षतु मां रामः पर्वकाले सुपस्थिते ॥ मारीचान्मे भयं घोरं समुत्पन्नं नराधिप ॥ इत्येवमुक्तो धर्मात्मा
राजा दशरथस्तदा ॥ मुहूर्तमिव निश्चेष्टः प्रत्युवाच वचनमब्रवीत् ॥ ऊनषोडशवर्षोयं रामो राजीवलोचनः ॥ न युद्धयोग्यतामस्य ३२
स्य पश्यामि सह राक्षसैः ॥ कामं तु मम यत्सैन्यं सर्वं तत्र प्रतिष्ठितं ॥ इत्येवमुक्तः स मुनिस्तं नृपं पुनरब्रवीत् ॥ रामान्नान्य
३२ बलं लोके पर्याप्तं तस्य रक्षसः ॥ बालोप्येष महातेजाः पर्याप्तस्तस्य निग्रहे ॥ यास्यामि राममादाय स्वस्ति तेस्तु नराधि
प ॥ इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजं ॥ जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमं ॥ स तदा दंडकारण्ये पर्वकाले तपस्वि
ने ॥ कृतत्वोपस्थितो रामः चित्रं विस्फारयन् धनुः ॥ अजातव्यंजनः श्रीमान् बालः श्यामः शुभेक्षणः ॥ एकवस्त्रधरो धन्वी शिखी
कनकमालया ॥ शोभयन् दंडकारण्यं दीप्तेन स्वेन तेजसा ॥ अदृश्यत तदा रामो बालचंद्र इवोदितः ॥ अथाहं मेघसंकाश-

तप्तकांचनकुंडलः ॥ बली लब्धवरो दर्पादाजगाम तदाश्रमं ॥ तेन दृष्टः प्रविष्टोहं तस्मिन्नु तपोवने ॥ मां च दृष्ट्वा धनुः सज्यं न
[illegible] कृतवान् ॥ अवज्ञाय ततोहं तु बालोयमिति राघवं ॥ विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः ॥ तेन मुक्तस्ततो बाणः
शितः शत्रुनिबर्हणः ॥ तेनाहं ताडितः क्षिप्तः समुद्रे पतितः पुरा ॥ रामस्य शरवेगेन निरस्तो भ्रांतचेतनः ॥ प्राप्तसंज्ञस्ततस्तात तले गंभी
निगतः पुरा ॥ एवमस्मि तदा मुक्तः कथंचित्तेन संयुगे ॥ अकृतास्त्रेण बालेन रामेणाक्लिष्टकर्मणा ॥ मया तु वार्यमाणस्त्वं यदि रामे
रारो ण विग्रहं ॥ कृच्छ्रं स्यापदं घोरामासाद्य न चिराद्दृढं ॥ क्रीडारतिविधिज्ञानां समाजोत्सवशालिनां ॥ राक्षसानां तथै
वोत्पन्नं संतापं लप्स्यसे ॥ हर्म्यप्रासादसंबाधां नानारत्नविभूषितां ॥ द्रक्ष्यसे त्वं पुरीं लंकां विनष्टां मैथिलीकृते ॥ अ
कुर्वंतोपि पापानि शुचयः पापसंश्रयात् ॥ परपापैर्विनश्यंति मत्स्या नागह्रदे यथा ॥ दिव्यचंदनदिग्धांगान् दिव्याभि
रणभूषितान् ॥ द्रक्ष्यस्यभिहतान् भूमौ तव दोषात्तु राक्षसान् ॥ हृतदारान् सदारांश्च दशदिक्षु विद्रुतान् ॥ हतशेषानशरणान्
द्रक्ष्यसि त्वं निशाचरान् ॥ शरजालपरिक्षिप्तामग्निज्वालासमावृतां ॥ प्रदग्धभवनां लंकां द्रक्ष्यसे दहनानना ॥ प्रमदानां
सहस्राणि राजन्तव परिग्रहः ॥ भवादतो समस्ता निविधविष्यसि मर्षणात् ॥ आत्मनश्च दशग्रीव ब्रुवे रक्ष्यताः पुनस्त्वया ॥ स
सर्गेतो विना रामं मैथिलीमानयिष्यसि ॥ सुखं ते हृदि चराचर्यं जीविते चेत्स्ममात्मनः ॥ यदिच्छसि सुखं चैव कुर्वतो भोक्तुं मा कृथा रा
मविप्रियं ॥ निवार्यमाणः सुहृदा मया भृशं प्रसह्य सीतां यदि धर्षयिष्यसि ॥ गमिष्यसि क्षीणबलः सबांधवो यमक्षयं रामशरा
हतजीवितः ॥ ७ ॥ इत्यारण्यकांडे ४५ सर्गः ॥ ७ ॥ इदानीमपि यद्वृत्तं तन्निबोध यदुत्तरं ॥ राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णः स
मागतः ॥ प्रविष्टो दंडकारण्यं पुण्यं मुनिजनैर्युतं ॥ दीप्तजिह्वो महाकायस्तीक्ष्णदंष्ट्रो महाबलः ॥ विचरन् दंडकारण्यं मुनिमांसो महा

मानः॥ अमिहे तेषु देवेषु चैत्य वृक्षेषु चावनम्॥ अत्यंतनियता का राक्षसापसोक्ता नमात्वन॥ निहत्य दंडकारण्ये तापसान् धर्मसंस्थिता
न् कथिराणि विवेशोह्ह्। सस्त्यामीसानिमक्षयन्॥ मुनिमांसाशिनः क्रूरः राक्षसा यत्र वन गोचरा॥ यस्मात् त्वं विदिर्मक्षो ह्विश्च्छु
दंडकावने॥ अपाहं दंडकारण्ये व्यचरन् धर्मदूषणाः॥ तापसान्यपितितास्तावत् पुरा वैरमनुस्मरन्॥ तेन हुत्य समयोज्जायां त्रिशतः
मात्र निवर्दणाः॥ विकृष्य बलवच्चापं सायकान्निशितान् खरान्॥ तौ ओदंडकारण्ये विमुक्तान् विषपाण्ये॥ कृतवान्सि मिदं सर्वं
गाणि स्व्वमेणा॥ तेषां प्राणाः स्वर्ग लोकं गताः सरो रामजातेन॥ आनमुनिदितासीवे नघप्रि पुरस्तागताः॥ प...
रामस्य राजन् ह्रदयभयपुराः ... तामनुको ... तावृभौ राघवौ हृतौ॥ तत मंत्रितेनाभीतः ता पद्मोद्दर्भसमागतः॥ ...
... कर्णं विनयप्रा याजीविते॥ समीपं यदि गाछेयं तदंतमे मही विलै॥ ... नीचबृ॥ राम ...
इत्या ह्रदस्तामिवोत्तकं॥ अपि राम ... शीतः पश्यामि यावणा॥ रामभ्रान्तमिदं सर्वं अरण्ये प्रतिभाति मे॥ राम
... रहिते राक्षसेश्वर॥ दृष्ट्वा ... रामं ... निविचेतनः॥ एकारादीनि वाक्यानि रामाद् ... ॥
... रामे ... ॥ नेह रामकथा कार्या यदि मां ... मिच्छसि॥
... राम ... नयंति मे॥ रक्षो रामे ... मानं ... सि॥ ... ३२
दुदेवो ... मया ... ॥ मारीचेन ... दर्शनं ततः॥ ... वाचं ... ॥
मे॥ ॥ इत्यारण्यकांडे ४६ सर्गः॥ ४७॥ अब्रवीत्परुषं वाक्यं अयुक्तं ... चोदितः॥ किं किं ... मारीचो ...
तपस्व ... मायावी ... सोचवर॥ ... मया ... राम ... ॥ धर्मज्ञ ...
ते॥ वाक्यं ... ममैव मवरं॥ तद् ... मया ...

विश्रोपत॥ पवस्य का ... ह्रदो मान्यमातरं पितरं तथा॥ स्त्री वाक्ये मा ... कृतः वनमेव गतस्तदा॥ आवरपत्नु मयातस्य से पुरो ...
नेह॥ मा ... कृत्वा ... ता दृतं ... वा॥ एषा मे निश्चिता बुद्धिः मारीच बुद्धिव ते ते॥ ... संदेहिरूपितां
सुहे॥ दोषं गुणं वा ... नमैचैव ... ॥ अपायम् उपायं वा कार्यस्यास्य विनिश्चिते॥ सह ...
ता॥ ... माल्मने॥ ... मति ... ॥ ...
साखमा॥ नेह ... नाप ... ॥ नाहि ... मानाहि मानं ... ॥ ...
... ॥ ... विकुर्वंति ... ॥ तस्मात् ... सत्त्वम॥ ना ...
पार्थिवा॥ ... मिच्छसि॥ ...
वापदिवा ... ॥ ... कर्तुमर्हसि॥ ... भव॥ ...
... ॥ ... कर्तुमर्हसि॥ ... विस्मया॥ ...
ता मे ... ॥ अप ... ॥ ...
वा॥ एवं कृतमिदं कार्यं ... ॥ ... मार्गं कार्यं ... ॥ ...
राघवो॥ ... कार्यं त्वया सह॥ एवं कृते त्विमं कार्यं ... राक्षसा॥ ...
... ॥ ततः कार्यमनुरूपमेव ... रिष्यसि॥ ...
मत्वर्वं च ... ॥ एतच्छ्रुत्वा ... तदपि ब्रवीहि॥ ७॥ इत्यारण्यकांडे ४७ सर्गः॥ ४७॥ आतंको

दारुणो वाक्ये प्रतिकूलो निशाचरः।। अब्रवीत्परुषं वाक्यं मारीचो नैर्ऋतर्षभः।। केनायमुपदिष्टस्ते विनाशः पापकर्मणा।। सपुत्रस्य स
राष्ट्रस्य सामात्यस्य च रावण।। कस्त्वया सुखिना राज्ञः पक्षैर्न नन्दति [illegible]।। केनेदमुपदिष्टं ते मृत्युद्वारमसारतः।। शत्रवस्ते
स्पष्टं व्यक्तं हीनवीर्या दशानन।। इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा।। केनेदमुपदिष्टं ते क्षुद्रेणाहितकर्मणा।। वध्याः
खलु न वध्यन्ते सचिवास्तव रावण।। ये त्वामुत्पथमापन्नं न निगृह्णन्ति चासकृत्।। अमात्यैः कामवृत्तो हि राजा विपथमास्थितः।
निग्राह्यः सर्वथा सद्भिर्न निग्राह्यो निगृह्यसे।। धर्ममर्थं च कामं च यशश्च विपुलं भुवि।। स्वामिप्रसादात्सचिवाः प्राप्नुवन्ति नि-
शाचर।। विपर्यये हि तिष्ठति [illegible]।। व्यसनं स्वामिवैगुण्यात्प्राप्नुवन्तीतरे जनाः।। राजमूलो हि विजयोऽस्माक-
कृपतो वर।। तस्मात्सर्वास्ववस्थासु रक्षितव्यो नराधिपः।। न चापि प्रतिकूलेन नाविनीतेन रावण।। राज्यं पालयितुं शक्यं न
तीक्ष्णेन निशाचर।। ये तीक्ष्णमन्त्रिणस्ते ते भज्यन्ते सह तेन वै।। विषमे तुरगाः शीघ्रा मन्दाः सारथयो यथा।। बहवः साधवो लोके
युक्ता धर्ममनुष्ठिताः।। परेषामपराधेन विनष्टाः सपरिच्छदाः।। स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण।। रक्ष्यमाणा ३५
न वर्धन्ते मेषा गोमायुना यथा।। अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः।। एषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः।। त-
३५ दिदं काकतालीयं घोरमासादितं त्वया।। अत्र किं शोचनीयस्त्वं ससैन्यो विनशिष्यसि।। मां निहत्य तु रामोऽसौ न चिरात्त्वां ह-
निष्यति।। एतेन कृतकृत्योऽस्मि म्रिये चाप्यरिणा हतः।। दर्शनादेव रामस्य हतं मामवधारय।। आत्मानं च हतं विद्धि हृत्वा सी-
तां सबान्धवम्।। आनयिष्यसि चेत्सीतामाश्रमात्सहितो मया।। नैव त्वमसि नैवाहं न लङ्का न च राक्षसाः।। निवार्यमाणस्तु म-
या हितैषिणा न मृष्यसे वाक्यमिदं दशानन।। परेतकल्पा हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्भिरीरितम्।। ० ।। इत्यार्षे रामायणे [illegible]

एवमुक्त्वा तु परुषं मारीचो रावणं तदा।। गच्छावेत्यब्रवीद्दीनो भयाद्रात्रिंचरप्रभोः।। प्रहृष्टस्त्वभवत्तेन वचनेन दशाननः।। परिष्व-
ज्य सुसंश्लिष्टमिदं वचनमब्रवीत्।। एतच्छौर्ययुक्तं ते स्वच्छन्दादिव भाषितम्।। इदानीमसि मारीच पूर्वमन्यो निशाचरः।। आरोहस्व
सि मे दिव्यं कामगं [illegible] चितम्।। मया समेतस्य युक्तं पिशाचवदनैः खरैः।। प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि।। तां शून्ये प्रसभं
सीतामानयिष्यामि मैथिलीम्।। ततो रावणमारीचौ विमानमिव तं रथम्।। आरुह्य ययतुः शीघ्रं तस्मादाश्रममण्डलात्।। त-
थैव पश्यमानौ तौ पत्तनानि वनानि च।। गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च।। समेत्य दण्डकारण्यं राघवस्या-
श्रमं ततः।। ददर्श सह मारीचो रावणो राक्षसेश्वरः।। अवतीर्य रथात्तस्मात्ततः काञ्चनभूषणात्।। हस्ते गृहीत्वा मारीचं रा-
वणो वाक्यमब्रवीत्।। एतद्रामाश्रमपदं दृश्यते कदलीवृतम्।। नानापक्षिगणाकीर्णं [illegible] कृते।। [illegible]
[illegible] सखे कार्ये।। क्रियतां तत्सखे शीघ्रं यदर्थं वयमागताः।। स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा।। मृगो भूत्वा-
श्रमद्वारे रामस्य विचचार ह।। [illegible] प्रवालमणिचित्रितः।। [illegible] सर्वरत्नमनोहरः।। [illegible]
विद्युन्मालेव [illegible] पदव्यां न।। [illegible] मणिभिश्चित्रितैः।। [illegible] विचचा-
र ह।। [illegible] कर्णिकारनिषेवितः।। समाश्रयन्मन्दगतिः सीतादर्शनकाङ्क्षया।। पुनर्गत्वा पुनर्गत्वा [illegible] मृगो-
त्तमः।। स क्रीडन्पुनरायाति पुनरेव निषीदति।। आश्रमद्वारमागम्य मृगयूथानि सेवते।। मृगैः परिवृतो गत्वा पुनरेव नि-
वर्तते।। सीताया दर्शनाकाङ्क्षी राक्षसो मृगतां गतः।। परिभ्रमति चित्राणि मण्डलानि विनिष्पतन्।। [illegible] ततः सर्वे मृ-
गा ह्यन्ये वनेचराः।। उपागम्य समाघ्राय विद्रवन्ति दिशो दश।। राक्षसः सोऽपि तान्वन्यान्मृगान्मृगवधे रतः।। प्रच्छा-

ग्र्यं भावस्य नशशामयतिसंस्थानः ॥ तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ कुसुमावचयव्यग्रा पादपानत्यवर्तत ॥ कर्णि
काराणशोकांश्च चूतांश्च मदिरेक्षणा ॥ कुसुमान्यपचिन्वंती चचार रुचिरानना ॥ अनर्हारण्यवासस्य सा तं रत्नमयं मृगं ॥
मुक्तामणिविचित्रांगी ददर्श परमांगना ॥ तं वै रुचिरदंतोष्ठी रूप्यधातुतनूरुहं ॥ विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥
स च तां रामदयितां पश्यन्मायामयो मृगः ॥ विचचार ततस्तत्र दीपयन्निव तद्वनं ॥ अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगं ॥
विस्मयं परमं सीता जगाम जनकात्मजा ॥ इत्यारण्यकांडे ४९ सर्गः ॥४९॥ स रामे पर्णशालायां छायामुपविष्टो महाबली ॥
जगाम मंदं दैवगत्या सर्वगात्रातिदर्शयन् ॥ तं मृगं कोचनं सीता दिव्यं मृगमिवोवेर ॥ सा तं संप्रेक्ष्य सुश्रोणी कुसुमा
नि विचिन्वती ॥ हेमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितं ॥ प्रहृष्टा चानवद्यांगी मृष्टहाटकवर्णिनी ॥ भर्तारमपि चा
क्रंदत् सायुधं चापि लक्ष्मणं ॥ तयाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ॥ वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगं ॥ शं ३५
कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ॥ तमेवैनं मृगं मन्ये मारीचं राक्षसं मृगं ॥ चरंतो मृगयां हृष्टाः पापेनोपाधिना
३५ वने ॥ अनेन निहता राजन् राजानः कामरूपिणा ॥ अस्य मायाविनो माया मृगरूपमिदं कृतं ॥ भानुमत्पुरुषव्याघ्र गं
धर्वपुरसन्निभं ॥ मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ॥ जगत्यां जगतीनाथ मायैषा हि न संशयः ॥ एवं ब्रुवाणं
सौमित्रिं प्रतिवार्य शुचिस्मिता ॥ उवाच सीता संहृष्टा छद्मना हृतचेतना ॥ आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः ॥
आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः ॥ मृगाश्चरंति सहिताश्चमराः सृमरा
स्तथा ॥ ऋक्षाः पृषतसंघाश्च वानराः किंनरास्तथा ॥ विचरंति महाबाहो रूपश्रेष्ठा महाबलाः ॥ न चास्य सदृशो राजन्

दृष्टपूर्वो मृगः पुरा ॥ तेजसा क्षमया दीप्त्या यथायं मृगसत्तमः ॥ नानावर्णविचित्रांगो रत्नबिंदुसमन्वितः ॥ द्योतयन्वनमव्यग्रं शोभते
शशिसन्निभः ॥ अहो रूपमहो लक्ष्मीः स्वरसंपच्च शोभना ॥ मृगोऽद्भुतो विचित्रोऽसौ हृदयं हरतीव मे ॥ यदि ग्रहणमभ्येति जीवन्नेव मृगस्त
व ॥ आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥ समाप्तवनवासानां राज्यस्थानां च नः पुनः ॥ अंतःपुरविभूषार्थो मृग एष भविष्यति ॥ इमं
मणिविचित्रांगं पश्य हेममयं मृगं ॥ आश्चर्यभूतं काकुत्स्थ मृगं स्वयमिहागतं ॥ दूर्वांकुरान्खादयंतं यदि हन्मि मयामृगाः ॥ अमिष्याम
शुकाकुंतलोदकौ तमिदं वने ॥ आर्यपुत्रस्य जीवंतं यदि ग्राह्यस्योपरि तौ लयेतामिसहासितुं ॥ कामवृत्तमिदं
रौद्रं स्त्रीणाम सदृशं मया ॥ वपुषा त्वस्य सत्वस्य विस्मयो जनितो मम ॥ तेन कांचनरोम्णा तु मणिप्रवरशृंगिणा ॥ तरुणादित्यवर्णेन
नक्षत्रपथवर्चसा ॥ बभूव राघवस्यापि मनो विस्मयमागतं ॥ मोहितः किन्नरस्येण सीतया च प्रचोदितः ॥ उवाच संहृष्टमना सौमित्रिं
मथ राघवः ॥ पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमां ॥ रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥ न वने नंदनोद्देशे न चैत्ररथ
संश्रये ॥ कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥ प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः ॥ शोभंते मृगमाश्रिताश्चित्रे
कांचनबिंदुभिः ॥ पश्यास्य जृंभमाणस्य दीप्तामग्निशिखोपमां ॥ जिह्वां मुखान्निःसरंतीं मेघादिव शतह्रदां ॥ मसारगल्लको
मुखः शंखमुक्तानिभोदरः ॥ कस्य नामानुरूपोऽसौ न मनो लोभयिष्यति ॥ कस्य रूपमिदं दृष्ट्वा जांबूनदमयप्रभं ॥
नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥ मांसहेतोरपि मृगान्विहारार्थं च धन्विनः ॥ घ्नंति लक्ष्मण राजानो मृगयायां महा
वने ॥ धनानि व्यवसायेन विचीयंते महावने ॥ धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ तत्सारमखिलं नृणां धनं संचयवर्द्धनं ॥ मनसा चिंतितं सर्वं यथा शुक्रस्य लक्ष्मण ॥
अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ॥ तमर्थमर्थशास्त्रज्ञः प्राहुरर्थ्याश्च लक्ष्मण ॥ एतस्य मृगरत्नस्य परा
र्ध्ये कांचनत्वचि ॥ उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ न कादली न प्रियकी न प्रवेणी न चाविकी ॥ भवेदेतस्य सदृशी स्पर्शनेन

र्मो नेति मे मतिः ॥ एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः ॥ उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ यदि वायं तथा यन्मां भवेद्वदसि
लक्ष्मण । मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ एतेन हि नृशंसेन मारीचेनाकृतात्मना ॥ वने विचरता पूर्वं हिंसिता मुनिपुंगवाः ॥
उत्थाय बहवोऽनेन मृगयायां जनाधिपाः ॥ निहताः परमेष्वासास्तस्माद्वध्यस्त्वयं मृगः ॥ पुरस्तादिह वातापिः परिभूय तपस्विनः ॥
उदरस्थो द्विजान् हन्ति स्वगर्भोऽश्वतरीमिव ॥ स कदाचिच्चिराल्लोके आससाद महामुनिः ॥ अगस्त्यं तेजसा युक्तं भक्ष्यस्तस्य बभूव ह ॥ समुत्था-
ने च तद्रूपं कर्तुकामं समीक्ष्य तं ॥ उत्स्मयित्वा तु भगवान् वातापिमिदमब्रवीत् ॥ त्वयाविगण्य वातापे परिभूताश्च तेजसा ॥ जीवलोके द्वि-
जश्रेष्ठास्तस्मादसि जरां गतः ॥ एवं तन्न भवेद्रक्षो वातापिरिव लक्ष्मण ॥ मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियं ॥ भवेद्धतोऽयं वातापि-
रगस्त्येनेव मां गतः ॥ इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीं ॥ अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ अहमेनं वधिष्यामि
ग्रहीष्याम्यथवा मृगं ॥ यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतं ॥ अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ यावत्पृषतमेकेन
सायकेन निहन्म्यहं ॥ हत्वैतच्चर्म आदाय शीघ्रमेष्यामि लक्ष्मण ॥ न गन्तव्यमितोऽन्यत्र यावन्नाहमिहागतः ॥ अप्रमत्तः
३८ तिष्ठ त्वं मैथिलीं रक्ष यत्तः सर्वतः ॥ प्रदक्षिणेनातिबलेन पक्षिणा जटायुषा बु- ३८
द्धिमता च लक्ष्मण ॥ भवाप्रमत्तः प्रतिगृह्य मैथिलीं प्रतिक्षणं सर्वत एव शंकितः ॥४३॥ इत्यारण्यकांडे ४३ सर्गः ॥४३॥ अथ
तु तं समादिश्य भ्रातरं रघुनन्दनः ॥ बबंधासिं महातेजा जांबूनदमयत्सरुं ॥ ततस्त्रिविनतं चापमादायात्मविभूषणं ॥ आबध्य
च कलापौ द्वौ जगामोदग्रविक्रमः ॥ तं वंचयानो राजेन्द्रं सादृश्येन कुपितेन्द्रियः ॥ मृगरूपमिव यस्य देहं स्वयं सृजत् ॥ तं वं-
चयानो राजेन्द्रमापतन्तं निरीक्ष्य सः ॥ बभूवान्तर्हितस्त्रासात्पुनः संदर्शने पतन् ॥ बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ॥
तं स पश्यति रूपेण द्योतमानमिवाग्रतः ॥ अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने ॥ अतिवृत्तमिषोः पाताल्लोभयानं कदाचन ॥
शंकितं तु समुद्भ्रान्तमुत्पतन्तमिवांबरे ॥ दृश्यमानमदृश्यं च नवोद्देशेषु केषुचित् ॥ छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमंडलं ॥

मुहूर्तादेव ददृशे दूरान्मुहूर्तान्न प्रदृश्यते ॥ दर्शनादर्शनेनैव सोऽपकर्षत राघवं ॥ स गतो दूरमध्वानं राघवस्तस्य मायया ॥ आसी-
त्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥ अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ॥ स तमुन्मादयामास मृगरूपो निशाचरः ॥
मृगैः परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥ ग्रहीतुकामं दृष्ट्वैव पुनरेवाभ्यधावत ॥ तत्क्षणादेव संत्रासात्पुनरन्तर्हितोऽभवत् ॥ पुनरे-
व ततो दूराद्वृक्षखण्डाद्विनिःसृतं ॥ दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ॥ भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ॥ सूर्यरश्मिप्र-
काशं ज्वलन्तमरिमर्दनं ॥ संधाय सुदृढे चापे विकृष्य बलवद्बली ॥ तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगं ॥ मुमोच ज्वलितं दीप्तम- ७
स्त्रं ब्रह्मविनिर्मितं ॥ स भृशं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥ तालमात्रमथोत्प्लुत्य न्यपतत्स शरातुरः ॥ व्यनदद्भैरवं नादं धरण्या-
मल्पजीवितः ॥ म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुं ॥ हा सीते लक्ष्मणेत्येवमाक्रोशत्स महास्वनः ॥ संप्राप्तकालमाज्ञाय
चकार च ततः स्वरं ॥ सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥ तेनैव मर्मणि निर्भिन्नः शरेणाप्रतिमेन सः ॥ मृगरूपं तु तत्त्यक्त्वा
राक्षसं रूपमास्थितः ॥ ततो विचित्रकेयूरः सर्वाभरणभूषितः ॥ हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥ तं दृष्ट्वा पतितं भू-
मौ राक्षसं घोरदर्शनं ॥ रामो रुधिरसिक्ताङ्गं चेष्टमानं महीतले ॥ जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ मारीचस्यैव मा-
यैषा पूर्वोक्तं लक्ष्मणेन तु ॥ तत्तदा ह्यभवच्चाद्य मारीचोऽयं मया हतः ॥ हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वने ॥ ममार राक्षसः
सोऽयं श्रुत्वा सीता कथं भवेत् ॥ लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ॥ इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ तत्र
रामं भयं तीव्रमाविवेश विषादजं ॥ राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वनं ॥ निहत्य पृषतं चान्यं मांसमादाय राघवः ॥ त्वरमा-
णो जनस्थानं ससाराभिमुखस्तदा ॥४४॥ इत्यारण्यकांडे ४४ सर्गः ॥ आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने ॥ उवाच लक्ष्मणं सीता
गच्छ जानीहि राघवं ॥ न हि मे हृदयं स्थाने जीवितं चावतिष्ठते ॥ क्रोशतः परमार्तस्य महान् शब्दः श्रुतो मया ॥ आक्रन्दमानं तु वने

समपश्यन्न मागतं ॥ आक्रंदमाने सौमित्रे परित्रातुं त्वमर्हसि ॥ लक्ष्मण न विरम्य वा वत्स भ्रातरं त्रातुं तोषितो ॥ रक्षसा सा वदत्रा मायामवेदितुं
नामिवो पतिं ॥ लक्ष्मण मत्तो कोऽस्त्यन्यस्त्वां भ्रातुर्विपत्तौ त्रातुं न ॥ तमुवाच ततः सीता [illegible] पिता [illegible] ॥ अभिज्ञोऽभिज्ञ सुमरे रामोऽस्त्यन्यल्लन्ते
सिल्लक्ष्मण ॥ अहं मत्स्या मवस्रुत्वा यास्यामि नायपद्यसे ॥ इत्युक्तः सीतया विल्लपते [illegible] लक्ष्मणा मन्यकुलः ॥ लोकान्म्नमूनकेतोन्तु न नानु
गच्छसि राघवं ॥ रामस्नेहेन ते प्रियं मन्ये लोहे सत्वात् तथा नास्ति ते ॥ ते न तिष्ठसि विक्लवः ॥ लक्ष्मण पश्य राक्षसान्मा घूर्णं ॥ कोऽयं क्षत्रियो मायाम्ने तस्मि
हिं मयावद ॥ अर्थः स्यादपि नावस्थाः यत्नो यानी [illegible] ॥ इति प्रेषितो वेदेह्या दृष्ट्वा लक्ष्मणपरिप्लुता ॥ ओजस्वी लक्ष्मणो [illegible]
सोम्हाच्यकृमिव ॥ पन्नगासुरगंधर्व देवदानवमानुषैः ॥ अशक्यः [illegible] वैदेहिममर्जो लक्ष्मणो वाय ॥ दृष्टिविदयमनुप्राप्य गोपयं पुप्लन्ति
प्रु ॥ मायासेषु स्थिता येषु कृ न देपूरगोप्पुत ॥ दानवेषु च देवेषु नसविदोना न लोके ॥ पोरा नाप्रतियुध्येत समरे वासवोपमं ॥ अव
समरे रामो लैवर्त्तव्यमर्हसि ॥ नत्वामेकाकिनीं तु सुन्दरि हे मायया नेतुं न शक्यं ॥ अनिवार्यं बलं तस्य बलैर्बलवतामपि ॥ त्रिभिर्लोकै
समुद्यतैरीश्वरैः सामरैः अपि ॥ हृदयं निर्वृतं ते स्तु सीता परितस्य तां नमये ॥ आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमं ॥ न स
मस्य चेरोपमग्नहि निर्विदेवतीसवेच ॥ गंधर्वनगरप्रख्या मायेषा तस्य राक्षसः ॥ न्यासभूतासि वैदेही न्यस्ता मयि महात्मना ॥
२४ न लोकान्वेषाहेनाद्देहं कुमितो त्वतहे ॥ कृतवैराश्च वैदेहि वयमेते निशाचरैः ॥ खरस्य निधने देवि जनस्थानवधं प्रति ॥ राक्षसा २४
विभावत्यो विरुवंति महावने ॥ हिंसाविहारा वैदेहि न चिंतयितुमर्हसि ॥ एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ॥ अब्रवीत्परुष
वाक्यं लक्ष्मणं सत्यवादिनं ॥ अनार्य करुणारंभ नृशंस कुलपांसन ॥ अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ रामस्य
व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ नैतच्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् ॥ त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ सु
दुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि ॥ मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ कथमिंदीवरश्यामं रामं राजीवलोचनं ॥ उ

पसंगम्य भर्तारं कामयेयं पृथग्जनं ॥ समक्षं तव सौमित्रे प्राणांस्त्यक्ष्ये न संशयः ॥ रामेण विना क्षणमपि न हि जीवामि भूतले ॥ इत्युक्तः परुष
वाक्यं सीतया रोमहर्षणं ॥ अब्रवील्लक्ष्मणः सीतां प्रांजलिर्विजितेंद्रियः ॥ उत्तरं नोत्सहे वक्तुं
दैवतं भवती मम ॥ वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ स्वभाव एष नारीणां एषु लोकेषु दृश्यते ॥ विमुक्तधर्माश्चपलास्ती
क्ष्णा भेदकराः स्त्रियः ॥ न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे ॥ श्रोत्रयोरुभयोर्मध्ये तप्तनाराचसंनिभं ॥ उपशृण्वंतु मे सर्वे साक्षिभूता
वनेचराः ॥ न्यायवादी यथा वाक्यमुक्तोऽहं परुषं त्वया ॥ धिक्त्वामद्य प्रणश्य त्वं यन्मामेवं विशंकसे ॥ स्त्रीत्वाद्दुष्टस्वभावेन गुरुवाक्ये व्यवस्थि
तं ॥ गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ॥ रक्षंतु त्वां विशालाक्षि समग्रा वनदेवताः ॥ निमित्तानि हि घोराणि
यानि प्रादुर्भवंति मे ॥ अपि त्वां सह रामेण पश्येयं पुनरागतः ॥ लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा ॥ प्रत्युवाच ततो वाक्यं तीव्रं बाष्प
परिप्लुता ॥ गोदावरीं प्रवेक्ष्यामि विना रामेण लक्ष्मण ॥ आबंधिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ पिबामि वा विषं तीक्ष्णं प्रवे
क्ष्यामि हुताशनं ॥ न त्वहं राघवादन्यं पदापि पुरुषं स्पृशे ॥ इति लक्ष्मणमाक्रुश्य सीता दुःखसमन्विता ॥ पाणिभ्यां रुदती दुः
खादुदरं प्रजघान ह ॥ तामार्तरूपां विमनां रुदंतीं सौमित्रिरालोक्य विशालनेत्रां ॥ आश्वासयामास न चैव भर्तुस्तं भ्रातरं किंचिदुवा
च सीता ॥ ततस्तु सीतामभिवाद्य लक्ष्मणः कृतांजलिः किंचिदभिप्रणम्य ॥ अवेक्षमाणो बहुशश्च मैथिलीं जगाम रामस्य समीप
मात्मवान् ॥ ७ ॥ इत्यध्यात्मरामायणे अरण्यकांडे सप्तमः सर्गः ॥ ७ ॥ तथा परुषमुक्तस्तु कुपितो राघवानुजः ॥ अथैवमाततो वहु राघवस्यैव मैथिली ॥
एतदंतरमासाद्य दशग्रीवः प्रतापवान् ॥ परिव्राजकरूपेण वैदेहीमन्ववर्तत ॥ [illegible] काषायसंवीतः ॥ शिखी छत्री उपानही ॥
वामे चांसेऽवसज्याथ शुभे यष्टिकमंडलू ॥ काममाससाद वैदेहीं भ्रातृभ्यां रहितां वने ॥ रहितां सूर्यचंद्राभ्यां संध्यामिव महत्तमः ॥ वि
सीतारामचंद्रेण पतिना कमलेक्षणा ॥ रोहिणीं शशिना हीनां ग्रहवद्दारुणोऽग्रहीत् ॥ तमुग्रतेजः कर्माणं जनस्थानरुहा द्रुमाः ॥ वीक्ष्य सं

न प्रकंपंते न प्रवाति च मारुतः॥ शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षंतं रक्तलोचनं॥ स्तिमितं गंतुमारेभे भयाद्गोदावरी नदी॥ रामस्य त्वंतरप्रेप्सुर्दशग्री
वस्तदंतरे॥ उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः॥ अभव्यो भव्यरूपेण भर्तारमनुशोचतीं॥ अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः॥ सहसा
भव्यरूपेण तृणैः कूप इवावृतः॥ अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीं॥ शुभां रुचिरदंतोष्ठीं पूर्णचंद्रनिभाननां॥ आसीनां पर्णशालायां
बाष्पशोकाभिपीडितां॥ पद्मपत्रविशालाक्षीं पीतकौशेयवासिनीं॥ अभ्यगच्छत वैदेहीं दुष्टचेता निशाचरः॥ स मन्मथशराविष्टो ब्रह्मघोषमु
दीरयन्॥ अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसेश्वरः॥ तामुत्तमां त्रिलोकानां पद्महीनामिव श्रियं॥ विभ्राजमानां वपुषा रावणः प्रशशंस
ह॥ एतावुपचितौ वृत्तौ सहितौ संप्रगल्भितौ॥ पीनोन्नतमुखौ कांतौ स्निग्धतालफलोपमौ॥ समौ निरंतरौ पीनौ दृष्ट्वैकेन मनोहरौ॥ मणि
प्रवेकाभरणौ रुचिरौ ते पयोधरौ॥ चारुस्मिते चारुदति चारुनेत्रे विलासिनि॥ मनो हरसि मे भीरु नदीवेग इवांभसा॥ का त्वं कांचन
वर्णाभे पीतकौशेयवासिनि॥ कमलानां शुभां मालां पद्मिनीव च बिभ्रती॥ ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने॥ भूतिर्वा
त्वं वरारोहे रतिर्वा स्वैरचारिणी॥ समाः शिखरिणः स्निग्धाः पांडुरा दशनास्तव॥ विशाले विमले नेत्रे रक्तांते कृष्णतारके॥ २८
विशालं जघनं पीनमूरू करिकरोपमौ॥ करांतमितमध्यासि सुकेशी संहतस्तनी॥ नैव देवी न गंधर्वी नासुरी न च यक्षिणी॥
२८ एवंरूपा मया नारी दृष्टपूर्वा महीतले॥ रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते॥ इह वासश्च कांतारे चित्तमुन्मादयंति मे॥
सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि॥ राक्षसानामयं वासो घोराणां कामरूपिणां॥ प्रासादाग्राणि रम्याणि नगरोपव
नानि च॥ संपन्नानि सुगंधीनि युक्तान्याचरितुं त्वया॥ वरं माल्यं वरं वस्त्रं वरं माल्याभरणानि च॥ भर्तारं च वरं मन्ये त्वद्युक्त
वरानने॥ का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते॥ वसूनां वा वरारोहे देवता प्रतिभासि मे॥ नेह गच्छंति गंधर्वा न च देवा

न मानुषाः॥ राक्षसानामयं वासः कथं नु त्वमिहागता॥ इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा॥ ऋक्षास्तरक्षवः कंकाः
कथं तेभ्यो न बिभ्यसि॥ मदान्वितानां घोराणां कुंजराणां तरस्विनां॥ कथमेका महारण्ये न बिभेषि वरानने॥ कासि कस्य कुतश्चित्त्वं
किंनिमित्तं च दंडकान्॥ एका चरसि कल्याणि घोरान्राक्षससेवितान्॥ द्विजातिवेषापहितं दृष्ट्वा रावणमागतं॥ सर्वैरतिथिस
त्कारैः पूजयामास मैथिली॥ उपनीयासनेनाद्य पाद्येनोपनिमंत्र्य च॥ अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शना॥ द्विजाति
वेषेण समीक्ष्य मैथिली समागतं पात्रकुसुंभधारिणं॥ अशक्यमुद्द्वेष्टुमुपायदर्शनं न्यमंत्रयद्ब्राह्मणवत्तमागतं॥ इ
यं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतां त्वया॥ इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्यग्रमिहोपभुज्यतां॥ निमं सुन्य
त्र्यमाणः प्रतिपूर्णभाषिणीं नरेंद्रपत्नीं प्रसमीक्ष्य मैथिलीं॥ प्रसह्य तस्या हरणे दृढं मनः समर्पयामास वधाय रावणः॥ ततः सुवेषा
ततः सुवेषे मृगयागते पतिं परीक्षमाणा सहलक्ष्मणे तदा॥ निरीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ॥ इत्यार्षे
अरण्यकांडे ४६ सर्गः॥४६॥ रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा॥ परिव्राजकलिंगेन शशंसात्मानमात्मना॥ ब्राह्मणश्चा
तिथिश्चैव अनुक्तो हि शपेत मां॥ ततो ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत्॥ तदुत्तमं मधुरं वाक्यं रावणं तं वरानना॥ अ
चिंतयित्वा वैदेही दुहिता जनकस्याहं मैथिलस्य महात्मनः॥ नाम्ना सीतेति भद्रं ते पत्नी रामस्य धीमतः॥
उषित्वा द्वादश समाः इक्ष्वाकूणां निवेशने॥ भुंजाना मानुषान्भोगान्सर्वकामसमृद्धिनी॥ ततस्त्रयोदशे वर्षे राजा
मन्त्रयत मे पतिं॥ अभिषेचयितुं राज्ये समेतो राजमंत्रिभिः॥ ततः संभ्रियमाणे तु राघवस्याभिषेचने॥ कैकेयी नाम भर्तारं
ममार्या याचितो वरौ॥ प्रतिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे॥ मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनं॥ द्वावयाचत भर्तारं

रसत्यसंधेनधीमता ।। नाहंभोक्ष्येनचस्थास्येनचपास्येकथंचन ।। एषमेजीवितस्यांतोरामोयद्यभिषिच्यते ।। इतिब्रुवाणांकैके
यींश्वशुरोमेसमन्मथः ।। अयाचतार्थैरन्वर्थैर्नचयाचांचकारसा ।। ममभर्तामहातेजावयसापंचविंशकः ।। अष्टादशतुवर्षाणिमम
मेतुविगण्यते ।। लोकेरामइतिख्यातोगुणवान्सत्यविक्रमः ।। विशालाक्षोमहाबाहुःसर्वभूतहितेरतः ।। कामार्तस्तुमहातेजाःपि
तारामस्यमहात्मनः ।। कैकेय्याःप्रियकामार्थंरामपूर्वंनाभिषिषिचेनृप ।। अभिषेकायतुपितुःसमीपंराममागतं ।। कैकेयीममभर्तारं
इत्युवाचद्रुतवती ।। तवपित्रासमाज्ञप्तंममेदंशृणुराघव ।। भरतायप्रदातव्यमिदंराज्यमकंटकं ।। त्वयाहिखलुवस्तव्यंनव
वर्षाणिपंचच ।। वनेप्रव्रजकाकुत्स्थपितरंमोचयानृतात् ।। तथेत्युक्त्वाचतांरामःकैकेयीमकुतोभयः ।। चकारतद्वचस्तस्याम
मभर्ताद्दृढव्रतः ।। दद्यान्नप्रतिगृह्णीयात्सत्यंब्रूयान्नचानृतं ।। एतद्ब्राह्मणरामस्यध्रुवंव्रतमनुत्तमं ।। तस्यभ्रातातुवैमात्रो
भ्रातालक्ष्मणोनामवीर्यवान् ।। रामस्यपुरुषव्याघ्रःसहायःसमरेरिपुघ्नः ।। सभ्रातालक्ष्मणोनामधर्मचारीमहायशाः ।। अन्वगच्छ
द्धनुष्पाणिःप्रव्रजंतंमयासह ।। तेवयंप्रच्युताराज्यात्कैकेय्यास्तुकृतेत्रयः ।। विचरामोद्विजश्रेष्ठवनंगंभीरमोजसा ।। समाश्वस
मुहूर्तंतुशक्यंवस्तुमिहत्वया ।। आगमिष्यतिमेभर्तावन्यमादायपुष्कलं ।। सत्वंनामचगोत्रंचकुलंचाचक्ष्वतत्त्वतः ।। एकश्चदंडका
रण्येकिमर्थंचरसिद्विज ।। एवंब्रुवंत्यांसीतायांरामपत्न्यांमहाबलः ।। प्रत्युवाचततस्तीव्रंरावणोराक्षसाधिपः ।। येनवित्रासितालोकाः
सदेवासुरपन्नगाः ।। अहंसरावणोनामसीतेरक्षोगणेश्वरः ।। त्वांतुकांचनवर्णाभांदृष्ट्वाकौशेयवासिनीं ।। नाहंस्वकेषुदारेषु
रतिंविंदाम्यनिंदिते ।। बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ।। सर्वासामेवभद्रंतेममाग्रमहिषीभव ।। लंकानाममेनगरीसमुद्रस्यम
ध्येममपुरी ।। सागरेणपरिक्षिप्तानिविष्टागिरिमूर्धनि ।। नीलजीमूतवर्णाभांतानामदेवसानीमहापुरी ।। विश्वकर्मकृता

३९ ३९

द्वियाहमेवालितेनमायतः ।। ...तेमयासार्धंवनेषुविहरिष्यसि ।। नचास्यारण्यवासस्यस्पृहयिष्यसिभामिनि ।। पंचदास्य
सहस्राणिसर्वाभरणभूषिताः ।। सीतेपरिचरिष्यंतिभार्याभवसिमेयदि ।। रावणेनैवमुक्तासाकुपिताजनकात्मजा ।। प्रत्यु
वाचानवद्यांगीतमनादृत्यराक्षसं ।। महागिरिमिवाकंप्यंमहेंद्रसदृशंपतिं ।। महोदधिमिवाक्षोभ्यमहंराममनुव्रता ।। महा
बाहुंमहोरस्कंसिंहविक्रांतगामिनं ।। नृसिंहंसिंहसंकाशमहंराममनुव्रता ।। पूर्णचंद्राननंवीरंराजवत्संजितेंद्रियं ।। पृथुकीर्तिंमहा
